International Journal of Sanskrit Research 2022; 8(4): 01-04

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 01-04
© 2022 IJSR
www.anantaajournal.com
Received: 02-04-2022
Accepted: 07-05-2022

**दिननाथशर्मा**
सहायकाचार्यः व्याकरणविभागः
सिक्किम-सरकारी-संस्कृत-
महाविद्यालयः साम्दोङ,
सिक्किमः, भारत

**Corresponding Author:**
**दिननाथशर्मा**
सहायकाचार्यः व्याकरणविभागः
सिक्किम-सरकारी-संस्कृत-
महाविद्यालयः साम्दोङ,
सिक्किमः, भारत

# वैदिकवाङ्मये आरण्यकग्रन्थस्यौचित्यम्

## दिननाथशर्मा

**उपोद्घातः**
ऋग्यजुसामाथर्वभेदेन चतुर्षु भागेषु विभक्तवैदिकवाङ्मयस्य औचित्यं किमिति विषये ब्राह्मणारण्यकोपनिषद्भ्यो ज्ञायते। इत्येतेषु ग्रन्थेषु पृथक्त्वेन विषयाः प्रतिपादिताः सन्ति। गार्हस्थ्यादीनां यज्ञविषये ब्राह्मणग्रन्थस्यौचित्यं प्राबल्यं चोच्यते। वानप्रस्थीनां कृते त्वारण्यकग्रन्थस्यैव प्राधान्यत्वं वैदिकसंस्कृतसाहित्ये प्रतिभाति। यदुपनिषदः सन्यासिनां मोक्षसाधनहेतुः स्वीक्रियन्ते जनैः।

इत्येतेषु विषयेष्वारण्यकग्रन्थस्याध्ययनेन को लाभः? किमस्य प्रयोजनम्? इति विषये ज्ञानार्थो विषयोपस्थापनं विहितं वर्तते अत्र अग्निहोत्रादीनां विधेरपि प्रवृत्तिर्जायते। श्रीमद्भागवते उक्तम्-

अग्निहोत्रं च दर्शश्च, पूर्णमासश्च पूर्ववत्।

चातुर्मासस्यानि च मुनेराम्नातानि च नैगमः।[1]

इत्येतेषु विषयेषूपलभ्यमानानि ज्ञानानि सर्वेभ्यः स्यादिति हेत्वत्र प्रस्तूयते।

**कूट शब्द:** वैदिकसंस्कृतसाहित्ये, ब्राह्मणारण्यकोपनिषद्भ्यो, ऋग्यजुसामाथर्वभेदेन

## विषयप्रवेशः

कस्तावदारण्यकः? इत्यस्मिन् विषये ब्राह्मणोपनिषदोः संयोजनकार्यं येन ग्रन्थेन विधीयते, स एवारण्यकः। संहितानामन्त्यभागो ब्राह्मणग्रन्थरूपेणोपस्थीयते तत्र यज्ञानां दार्शनिकाध्यात्मिकपक्षयोरेव विवक्षा प्राप्यते। तस्यैव पल्लविरूपमेवारण्यकग्रन्थो विद्यते। तस्यारण्यकस्यैव विस्तृतरूपेण व्याख्यात्मको भागोपनिषदित्याचक्षते। याः खलु वेदानां शाखाः निर्दिष्टाः, ताः सर्वा अपि वर्तमानकाले नैव लभ्यन्ते। तासु शाखासु कश्चिद्भाग आरण्यक इत्यभिधीयते।

तत्र आरण्यकग्रन्थस्य कोऽर्थः? अरण्ये भव आरण्यकम् इत्यत्र अरण्यशब्दात् “तत्र भव” ४-३-५३ इति सूत्रेण भवार्थे ‘ठक्’ प्रत्यये आरण्यकशब्दो निष्पद्यते। यस्यार्थः - अरण्ये वने वा प्राप्तव्यानि वस्तूनीति। अस्यार्थस्याभिप्रायोऽयं जायते यत् अरण्ये प्राप्तव्यानि मननचिन्तनाध्ययनशास्त्रीयचर्चाध्यात्मिकविवेचनानि आरण्यकशब्दादेव संगृह्यन्ते। विषयेऽस्मिन् सायणाचार्यो वक्ति -

अरण्याध्ययनादेतद् आरण्यकमितीर्यते।
अरण्ये तदधीयीतेत्येवं वाक्यं प्रचक्ष्यते।।[2]

अर्थादरण्ये इत्येतेषामध्ययनमध्यापनञ्च भवतिस्म अत एवारण्यकनाम्ना सुप्रसिद्धम्। तेषां ग्रन्थानामौचित्यमात्मविद्या, तत्त्वचिन्तनन्तथा सरहस्यात्मचिन्तनञ्चास्ति। विषयेऽस्मिन् गोपथ आरण्यके कथितमपि वर्तते –"सर्वे वेदाः सरहस्याः सब्राह्मणाः सोपनिषत्काः।"[3]

आरण्यकग्रन्थेषु यज्ञः कथं करणीयः तस्य कोऽभिप्रायः? तथा ब्रह्मविद्यायाः प्रतिपादनं किञ्चेत्येषु विषयेष्वप्यङ्गीक्रियते, अतोऽयं रहस्य-ग्रन्थोऽपि निगद्यते।
वैदिकतत्त्वमींमासेतिहासेषु आरण्यकग्रन्थस्याधिक्यं महत्त्वं स्वीक्रियते। विषयेऽस्मिन् महाभारतस्यादिपर्वण्यपि भगवता व्यासेन आरण्यकग्रन्थस्य महत्त्वमेवं प्रतिपादितम्-

नवनीत यथा दध्नो मलयाच्चन्दनं यथा।
आरण्यकञ्च वेदेभ्यः ओषधिभ्योऽमृतं यथा।। [4]

यथा- दध्नो घृतम्, मलयाचलपर्वतात् चन्दनम्, ओषधिभ्योऽमृतं जायते तथैव वेदेभ्यः साररूपेणारण्यकग्रन्थाः समुपलभ्यन्ते। इत्येतेषु ग्रन्थेषु यज्ञस्य रहस्योद्घाटनं भवति। अस्यापरो विषयोऽपि वर्तते, स चात्मविद्या तथा सरहस्यात्मकविषयाणां विवरणमिति। वनेष्वेव स्थित्वा स्वाध्यायधार्मिककार्ययोरेव संलग्नानां मानवानां कृतेऽव अस्य ग्रन्थस्योन्नयनमिति प्रतीयते। प्राणविद्याया एव महिमानञ्च प्रतिपाद्यते ग्रन्थेऽस्मिन्। ऐतरेयारण्यकग्रन्थे प्रोक्तमपि– "सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्धः एवं सर्वाणि भूतानि आपिपीलिकाभ्यः प्राणेन बृहत्याविष्टब्धानीत्वेवं विद्यात्।"[5]
अर्थात्- प्राणोऽयम् अस्य चराचरजगतो धारक एव, तस्य शक्तेः एवान्तरिक्षमपि स्वस्थानेऽव स्थीयमानो वर्तते। अनेनैव स्थूलशरीरयुक्तप्राणिनः पिपीलिकां यावत् सर्वेऽपि जीवाः प्राणस्यैव साहाय्येन विधृताः सन्ति। प्राणाभावात् जगति विद्यमानानां स्थिरजङ्गमानां सर्वेषामपि पदार्थानां अभाव एव। तर्हि जगति यदि न प्राण स्यात् यानि खलु वस्तुन्यस्माकं नेत्राभ्यामवलोक्यन्ते तानि सर्वाणि असिद्धान्येव। अत एव प्राण व्याप्तरूपात्मको विषय इति अस्माभि वक्तुं शक्यते। उक्तमपि– "सर्वे हीदं प्राणेनावृतम्"। तदतिरिक्ताः प्रतीकोपासनाब्रह्मविद्याध्यात्मिकानां वर्णनेनैवारण्यकग्रन्थानां वैशिष्ट्यं महत्त्वञ्च जायेते। विषयेऽस्मिन्नेव संलग्नस्यास्य ग्रन्थस्य महत्त्वं विशिष्टमस्ति।

संहितानन्तरं ब्राह्मणग्रन्थाः समायान्ति, तत एवारण्यकग्रन्थाः जायन्ते। तस्यारण्यकग्रन्थस्यैव व्याख्यात्मकरूपेणोपनिषदः समुपलभ्यन्ते।
अनयोः ब्राह्मणारण्यकग्रन्थयोर्मध्ये अन्तःसम्बन्धो दरीदृश्यते। तर्हि कथमारण्यकस्योद्भवोऽभूदित्याशङ्कायां संहिताब्राह्मणग्रन्थयोः यज्ञस्य वर्णनं विस्तृतरूपेण लभ्यते। तत्सर्वं मानवानां कृते काठिन्यमभवत्, अत एव आरण्यकग्रन्थानामुद्भवो विहितः। येन यज्ञस्य विधिः सरलतया प्रतिपादितः। यस्य साहाय्येन मानवात्मिकशान्तिहेतु आध्यात्मावश्यकतायाः अनुभवः विहितस्तथा स्थूलद्रव्यमययज्ञात् सूक्ष्माध्यात्मयज्ञं प्रति प्रवृत्तिर्भवतीति। अपरञ्चापि दुर्बोध्यतायाः सज्जा भवेम इति हेतु आरण्यकग्रन्थस्योद्भवो विहितः।
अपरञ्चाप्यस्य महत्त्वं दृश्यते– यथा ब्रह्मचर्याश्रमार्थं संहिता प्राधान्येन वर्तते, ब्राह्मणग्रन्थविहितकर्मकाण्डस्य गृहस्थाश्रमो प्रतिपादनविषयो वर्तते, वानप्रस्थाश्रमस्य कृते आरण्यकस्तथोपनिषद् संन्यासाश्रमहेतुः प्रथितः।
वैदिकज्ञानवाङ्मयस्यान्तर्गत एवारण्यको ब्राह्मणग्रन्थस्य एकः भागो विद्यते। एतेषामारण्यकग्रन्थानां प्रणेतारो न चैक एवापितु नैके ऋषयः स्वीक्रियन्ते। प्रायश आरण्यकग्रन्थानां प्रणेतारोऽपि ब्राह्मणग्रन्थस्य रचनाकाराः एव मन्यन्ते। सम्प्रति वैदिकवाङ्मये प्रमुखाः अष्टौ एवारण्यकाः समुपलभ्यन्ते–

१. ऋग्वेदस्यारण्यकः – ऐतरेय आरण्यकः, शांखायन आरण्यकश्च।
२. शुक्लयजुर्वेदारण्यकः – बृहदारण्यकः।
३. कृष्णयजुर्वेदारण्यकः – तैत्तिरीय आरण्यकः, मैत्रायणी-आरण्यकश्च।
४. सामवेदारण्यकः – तवल्कार आरण्यकः, छान्दोग्य आरण्यकश्च।
५. अथर्ववेदारण्यकः – गोपथारण्यकः।

एतेषामारण्यकग्रन्थानां प्रतिपाद्यविषयः कः? इत्याशंकायां– आत्मदर्शनपरमात्मदर्शनाध्यात्मिकज्ञानप्रतिपाद्यविषयाः प्रमुखाः सन्ति। ग्रन्थोऽयं यज्ञात्मिकयोर्मध्ये दार्शनिकपक्षः कः? विषयेऽस्मिन् विवेचनं करोति। अत्र प्रतिपाद्यविषयः प्राणविद्या वर्तते। "प्राणोऽग्निः परमात्मा" मैत्रायण्यारण्यक इत्यकथयत्। प्राणः परब्रह्मरूपेण मन्तव्य इति ग्रन्थस्यापर आशयः।
तैत्तिरीयारण्यके ग्रन्थे यज्ञोपवीतस्य महिमोल्लिखिता वर्तते। यज्ञोपवीतधारणानन्तरं विधीयमानान्यध्ययनयजनादीनि यानि कार्याणि क्रियन्ते, तानि सर्वाण्यपि यज्ञकोटौ समायान्ति। संन्यासिनां कृते परिव्राजकशब्दस्य प्रयोगो

भवति- तत्र "बातरशना ह वा ऋषयः श्रमणा" इत्यकथयत् तैत्तिरीयारण्यकः। परिव्राजकशब्दः प्रव्रज्यादेवोत्पद्यते, तस्याभिप्रायो ब्रह्मज्ञानार्थं गृहं त्यक्त्वारण्यगमनमिति। अस्य प्रारम्भो बृहदारण्यकेऽभवत्। तत्रोक्तमपि वर्तते –

"एतदेव विदित्वा मुनिर्भवति। प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति।"[6]

ऐतरेयारण्यकः –आरण्यकोऽयं ऋग्वेदेन सम्बद्धः। अयम् ऐतरेयारण्यकस्यैव परिशिष्टभागेन ज्ञायते। ग्रन्थेऽस्मिन् प्रामुख्येन पञ्चाध्यायाः (आरण्यकाः) वर्तन्ते। एतेषामपरं नाम प्रपाठकोऽपि उच्यते। प्रपाठकः अध्यायेषु विभज्यन्ते। मन्यन्ते यदस्य ग्रन्थस्यादितः तृतीयारण्यं यावत् ऐतरेयेण समुल्लिखितो वर्तते। चतुर्थारण्यकस्याश्वलायनस्तथा पञ्चमारण्यकस्य शौनक उरीक्रियते। प्रथमारण्यके महाव्रतस्य वर्णनं विद्यते। अत्र प्रयुज्यमन्त्राणामाध्यात्मिकप्रतीकात्मकयोः व्याख्या विधीयते।

द्वितीये आरण्यके – निष्कैवाल्यस्तथा प्राणविद्यापुरुषयोर्मध्ये सम्बन्धः कः? विषयेऽस्मिन्नेव विवरणमुपस्थाप्यारण्यकोऽयं प्राधान्येन विराजते। ऐतरेयारण्यकस्य तृतीयारण्यकः प्रामुख्येनाङ्गीक्रियते। अस्मिन् संहितापदपाठक्रमपाठस्वरव्यञ्जनादीनां वर्णनं प्रस्तूयते। सम्बन्धेऽस्मिन् शाकल्यमाण्डुकयोरप्यभिमतं स्वीक्रियते। महानाम्नीमन्त्राणां सङ्कलनं चतुर्थारण्यके प्राप्यते। ये खलु मन्त्राः महाव्रतादिष्वेवोच्यन्ते। तथैव पञ्चमारण्यके निष्केवाल्यशस्त्रस्य वर्णनं वर्तते।

शांखायनारण्यकः ऋग्वेदेन सम्बद्धः। ऐतरेयारण्यक इव पञ्चदशाध्यायेषु विभक्तोऽयं ग्रन्थः १३७ (सप्तत्रिंशदुत्तरशताधिकेषु) खण्डेषु प्राप्यते। अंशैकस्य कौषीतक्युपनिषदिति नाम्ना सुप्रसिद्धः।

ग्रन्थेऽस्मिन् बाह्याग्निहोत्राभ्यान्तराध्यात्मिकयोर्मध्ये द्वितीयस्यैव प्राधान्यम् अङ्गीक्रियते। जनाः बाह्ययज्ञं कुर्वन्ति, परन्त्वाभ्यान्तरात्मतत्त्वं न विन्दन्ति। देवाः अन्तेऽव विराजन्ते तस्यैव चिन्तनं करणीयम्। तेनैव सर्वैस्तृप्तिः लभ्यते। अस्मिन्नेवारण्यके यदयम् आत्मा स एष तत्त्वमसि, इत्यात्माऽवगम्यः अहं ब्रह्मास्मि इति वचनस्यापि प्रभूत्वं दरीदृश्यते।

चतुर्दशाध्याये वेदाध्ययने तत्तस्यार्थस्य बोधो भवितव्यः, इत्येतेषु विषयेषु प्रतिपादितो वर्तते। तत्र प्रथितमपि–

स्थाणुरयं भारहारः किलाभूद्, अधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इतः सकलं भद्रमश्नुते, नाकमेति ज्ञानविधूतपाप्मा।।[7]

अर्थात् – विनार्थज्ञानेन वेदस्याध्ययनं नैव कर्तव्यम्। यदि केनचित् क्रियते चेत् स मूर्खवद् प्रतिभाति, परन्तु यः खलु वेदार्थस्य वेत्ता, वस्तुतः स अपापयुक्तेन मोक्षस्याधिकारी एव। उक्तञ्च-

गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठस्थः षडेते पाठकाधमाः।।[8]

शांखायन- आरण्यके आचार्याणां वंशपरम्परा अपि लभ्यते। अस्मिन् महाव्रतवर्णनम्, तीर्थमहिमा, प्राणस्य श्रेष्ठत्वम्, आध्यात्मिकाग्निहोत्रस्य विवेचनम्, मृत्युनिराकरणस्य विहितयज्ञविधानम्, श्रवण-मनन-निदिध्यासानां कृते शरीरस्य शुद्धता तथा तपस्याश्रद्धादमादीनां किमावश्यकमिति विषयेषु विवेचनम्, वेदार्थज्ञाने को लाभः, अहं ब्रह्मास्मीति वाक्यस्य कोऽभिप्राय इत्येतेषु विषयेषु शांखायनारण्यके वैभिन्नेन विवरणं प्रस्तूयते।

यजुर्वेदीयारण्यकग्रन्थः- वेदिकसाहित्ये शतैकं शताधिकं वा यजुर्वेदस्य शाखा मन्यन्ते। सम्प्रदायभेदयोः कारणेन कृष्णशुक्लशाखाद्वयेन समुपलभ्यते। तत्र कृष्णयजुर्वेद षडाशीतिस्तथा शुक्लयजुर्वेदस्य पञ्चदशशाखानामुल्लेखनं विहितम्।

शुक्लयजुर्वेदस्य पञ्चदशशाखासु केवलं शतपथब्राह्मणग्रन्थरेव उभयोर्माध्यान्दिनीकाण्वयोः प्रतिनिधित्वेनोपलभ्यते। अनयोर्मध्ये एक एवारण्यकोऽस्ति बृहदारण्यक इति। अस्मिन् ग्रन्थे आत्मतत्त्वस्य महती विवेचना विद्यते ।

तैत्तिरीयमैत्रायणीनाम्ना उभावारण्यकौ कृष्णयजुरवेदस्यारण्यकरूपेण सुप्रसिद्धौ स्तः। तैत्तिरीयारण्यके भाद्र, सह वै, चिति, युञ्ज ते, देव वै, परे, शिक्षा, ब्रह्मविद्या, भृगु, नारायणीयादयो दश प्रपाठकाः सन्ति। प्रारम्भेऽव भद्रं कर्णेभिः मन्त्रादेवास्यारण्यकस्य प्रारम्भो भवति, अत एव अयं भद्रः नाम्नेति ज्ञायते।

विशेषत अस्मिन् आरण्यके पञ्चमहायज्ञानां विवेचनं प्रस्तोस्यते। के च ते पञ्चमहायज्ञाः? १. ब्रह्मयज्ञः (सन्ध्याबन्धनादिः), २. देवयज्ञः (अग्निहोत्रादिः), ३. पितृयज्ञः (मातापित्रोः सेवा, श्राद्धतर्पणादिः), ४. मनुष्ययज्ञः (सेवासत्कारादिः) तथा ५. भूतयज्ञ (बलिवैश्वादिः)। प्रतिदिनं तेषां पालनं करणीयमिति विषयेऽपि प्राधान्यं प्रदत्तं वर्तते। उक्तमपि – पञ्च वा एते महायज्ञाः सतती प्रतीयन्ते।

एतदतिरिक्तम् अस्मिन् आरण्यके स्वाध्यायाभिचारप्रयोगभौगोलिकवर्णननिर्वचनादि विवेचनानि प्रतिपादितानि सन्ति। निर्वचनस्य वर्णनावसरे कश्यपशब्दस्यार्थः सूर्य इत्युक्तः। प्रथमप्रपाठकादारभ्य दशमप्रपाठकपर्यन्तमग्रेः

उपासनास्वाध्यायपञ्चमहायज्ञचातुरहोत्रविवेचनं प्रवर्यहोमसम्बन्धमन्त्राः, पितृमेधसम्बन्धविवेचनमन्त्रा अपि सम्यक्तया प्रतिपादिताः।

मैत्रायणी-आरण्यकः - कृष्णयजुर्वेदीयमैत्रायणीशाखायाः आरण्यकोऽयं ग्रन्थः। अस्मिन् प्रणस्य ऊँकारस्य वा स्वरूपं किमिति विषयेऽपि प्रतिपादितमस्ति। अस्याशयः अनेनैव प्रणवेन ब्रह्मणः चिन्तनं करणीयमिति प्रतिभाति। उक्तमपि –

> य उद्गीथः स प्रणवः एतद् ब्रह्म। तस्मा ओम् इत्यनेन एतद् उपासीत।। 9

ब्रह्मैक परन्तु अस्य विविधानि रूपाणि उरीक्रियन्ते, तं मानवाः वैभिन्नेन रूपेणोपासन्ते। यथा –

> त्वं ब्रह्मा त्वं च वै विष्णु त्वं रूद्रस्त्वं प्रजापतिः।
> त्वमग्निर्वरूणो वायुः त्वमिन्द्रस्त्वं निशाकरः। 10

स एवेश्वरः सर्वान्तर्यामी, ज्ञानं विशुद्धश्च वर्तते। तमेव सर्वज्ञानमयो हि स इत्यकथयत्। तस्येश्वरस्य चिन्तनं भागवते एवं विहितं वर्तते –

> ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम्।
> प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं, यद्वासुदेवं कवयो वदन्ति।। 11

अस्यारण्यकस्य विशेषत ईश्वरचिन्तनमम् इति विषयोऽस्ति। अर्थादेक एव विषीर्यते इति। अत्र मनसा निबन्धनं तदेव बौद्धिकक्रियाणां सञ्चालकविषये तथा संकल्पविचिकित्साश्रद्धाऽश्रद्धा-धैर्याधैर्य-धीह्रीभयादयः मनस एव स्वरूपाणि सन्तीति विवेचनं प्रतिपादितमिति।

सामवेदस्यारण्यकग्रन्थरूपेण छान्दोग्यतवल्कारौ स्तः। सामवेदस्य जैमिनिशाखाया आरण्यकरूपेण तवल्काराराण्यकोऽस्ति। चतुर्ष्वध्यायेषु विभक्तोऽयं ग्रन्थो विविधेष्वनुवाक्येषु च प्राप्यते।

प्रणवस्य महत्वं, वेदस्य सृष्टिप्रक्रिया, अतिमानवस्य शक्तोपासना तथा देवशास्त्रीयैतिहासिकयोश्च विवेचनेन प्रसिद्धोऽयं ग्रन्थः।

छान्दोग्यारण्यके सामनुद्गीथयोः धार्मिकदृष्ट्या व्याख्या विहिता। अस्माद् ग्रन्थादेव छान्दोग्योपनिषदः रचना जाता। केचन मन्यन्ते यदथर्ववेदस्य कोऽपि नास्त्यारण्यकग्रन्थः। वैदिकवाङ्मये अस्य वेदस्य नवशाखायाः बाहुल्यं विद्यते। अस्य ब्राह्मणग्रन्थत्वरूपेण गोपथारण्यकोऽस्ति। ब्रह्मणस्यैव ब्रह्मविद्यापरक भागस्यापरो नाम-आरण्यक इति।

**उपसंहारः**

ब्राह्मणोपनिषदोः संयोजनविषयो विद्यते आरण्यकः। संहितानामन्तिमभागो ब्राह्मणग्रन्था मन्यन्ते। इत्येतेषु ग्रन्थेषु यज्ञानां दार्शनिकाध्यात्मिकपक्षयोः यान्येवाङ्कुराणि समुत्पद्यन्ते तेषां पल्लवितरूपमेवारण्यक इति। अरण्ये वने वाध्ययनाध्यपनादीनां कार्याणां विवेचनेनैवास्य ग्रन्थस्य नामारण्यक इति।

तत्र आत्मविद्या-तत्त्वचिन्तन-रहस्यात्मकविषयाणां वर्णनं लभ्यते। तदतिरिक्तं प्राणविद्यायाः, प्रतीकोपासनायाः, ब्रह्मविद्यायाः, आध्यात्मिकतायाश्च वर्णनेनारण्यकानां महती विशिष्ठता दरीदृश्यते।

तेष्वारण्यकेषु प्रथमवैदिकसांहिताऽस्ति ततो ब्राह्मणस्तथारण्यकाः। एवमेव आरण्यकादेवोपनिषदः। विनारण्यकेन ब्राह्मणग्रन्थस्य पूर्ति नैवोपलभ्यते। अत एव तस्य पूरक आरण्यकः। एकस्यां पङ्क्तौ ब्राह्मणानां पूरकरूपेणारण्यकाः सन्ति, तथैवोपनिषद्ग्रन्था आरण्यकस्य पूरकरूपेण स्वीक्रियन्ते। अनेनैवं ज्ञानं भवति यदारण्यकस्य प्रारम्भिकरूपं ब्राह्मण एव तथोपनिषदन्तिमो भागः। एतेषामारण्यकाणां रचनाकारः प्रायशो ब्राह्मणभागस्यैव रचनाकारोऽस्तीति वैदिकसंस्कृतसाहित्येतिहासः प्रतिपादयति।

आत्मदर्शनम्, परमात्मदर्शनम्, आध्यत्मिकज्ञानादिविषयाश्च सन्त्यस्य प्रतिपाद्यविषयाः। आरण्यकेषु यज्ञानामाध्यात्मिकदार्शनिकपक्षयोर्मध्ये विवेचनं प्रतिपादितमिति मुख्यत्वेन प्रतिभाति। केयं प्राणविद्या विषयेऽस्मिन्नप्यारण्यकेष्वैव प्रतिपादिताः सन्ति। कुत्रचिदस्ति प्राणविषयकालचक्रस्य संज्ञा प्रदत्ता। अत्राहर्निशयोः प्राणापानभेदेनामन्यन्ते जनाः। तत्र षडिति संख्यकारण्यकाः सन्तीति केचनमते वर्तते चेत् अपरमते अष्टावारण्यकाः सन्तीति विषयाः।

## सन्दर्भ ग्रंथ सूची


1. श्रीमद्भागवत महापुराण ११.१८.०८
2. तैत्तिरीयारण्यक भाष्य ६
3. गोपथब्राह्मण १.२.१०
4. महाभारत आदिपर्व १.३३१.३
5. ऐतरेय आरण्यक २.१.६
6. बृहदारण्यक ४.४.२२
7. शांख्यायन आरण्यक अध्याय १४
8. पाणिनीयशिक्षा श्लोक ३२
9. मैत्रायणी आरण्यक ६.४
10. मैत्रायणी आरण्यक ५.१
11. श्रीमद्भागवतमहापुराण १.१२.११